वेति चेदुच्यते । अस्तु तावत् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्त्तृजन्यतावच्छेदकत्वेन सकर्त्तृकत्वव्याप्यत्वं ग्राहकसमानत्वात् विनिगमनाभावाद्विरोधाभावाच्च सकर्त्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुतः, घटत्ववद्व्यापकस्यापि जन्यतावच्छेदकत्वात् । उभयसिद्धसकर्त्तृकेऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेन्न शरीरजन्यत्वविनिवेश्यत्वेन तुल्यन्यायेन प्रथमं कर्त्तृजन्यत्वे जन्यत्वमवच्छेदकं कॢप्तमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्त्तृकत्वव्यापकत्वानवगमात् । अतएव न संदिग्धोपाधित्वम् । ननु घटादौ शरीरजन्यत्वे कर्त्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात् न च लाघवाद्घटत्वादिकमेव तथा, कर्त्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः । एवं शरीरजन्यत्वस्य व्याप्यं सकर्त्तृकत्वं वह्नेर्धूम इवेति भवत्युपाधिः । किञ्च कर्त्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्त्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यतानिश्चय इति चेत्तर्हि घटादौ कर्त्तृजन्यत्वे गृहीते तस्य शरीरावच्छेदकत्वं ग्रहीतव्यं घटे च घटत्ववज्जन्यत्वमपि बाधकं विना कर्त्तृजन्यतावच्छेदकं गृहीतमतोजन्यमात्रे कर्त्तृजन्यत्वान्न शरीरजन्यत्वे तदवच्छेदकं प्रथमगृहीतोपजीव्यविरोधात् । अतएव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि । एतेनानणुत्वन्नित्यवयववृत्त्यन्यत्वादय उपाधित्वेन निरस्ताः जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात् । तथापि क्षित्यादिकं न कर्त्तृजन्यं शरीराजन्यत्वात् व्योमवदिति सत्प्रतिपक्षोऽस्त्विति चेत् न अस्य प्रसिद्धकर्त्तृजन्यत्वाभावविषयकत्वात् अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात् स्थापनानुमानञ्च पक्षधर्मताबलात् प्रसिद्धकर्त्तृभिन्नकर्त्तृकत्वसाधकमतोभिन्नविषयकत्वान्न प्रतिबध्यप्रतिबन्धकभावः । अतएव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमपास्तं तस्य प्रसिद्धाभावविषयकत्वेनाप्रसिद्धाभावाविषयकत्वात् । व्यक्तिसाधकस्य विशेषतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात् अन्यथानुमानवैयर्थ्यात् । कर्त्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत् कर्त्तृजन्यत्वमनुगतमपि पक्षधर्मताबलेन प्रसिद्धं कर्त्तारमादाय पर्य्यवस्यति तदभावस्तु प्रसिद्धस्य कर्त्तुरभावमादाय सिद्ध्यति नाप्रसिद्धस्य अनुगतस्यापि कर्त्तृजन्यत्वस्य तदभावस्य च, कर्त्तृव्यक्तिघटितत्वात् अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात् । नचैवं सत्प्रतिपक्षोच्छेदः तस्य गोत्वाद्येकभावाभावविषयकत्वात् । एतेन ज्ञानत्वं न नित्यावृत्ति ज्ञानमात्रवृत्तिधर्मत्वात् स्मृतित्ववत्, ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात् सुखवत् "आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवदित्याद्यपास्तं, प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेर्व्यतिरेकविषयत्वात् अप्रयोजकत्वाच्च । किञ्च क्षित्यादौ शरीराजन्यत्वमसिद्धम् अदृष्टद्वारा तज्जन्यत्वात् नचादृष्टाद्वारकजन्यज्ञानाजन्यत्वं हेतुः ज्ञाने जन्यत्वविशेषणस्याव्यावर्त्तकतया वैयर्थ्यात् । न च स्थापनायां पक्षविशेषणेऽप्येष दोषः प्रमेयोघट इतिवत्तदुपरक्तबुद्धेरुद्देश्यत्वात् अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वं लाघवेनाजन्यत्वस्यैव व्याप्यत्वात् । न च निष्प्रयोजनविशेषणमसिद्धं व्याप्तिग्रहोपयुक्तविशेषणवत्, पक्षधर्मतौपयिकविशेषणस्यापि सप्रयोजनत्वात् व्यभिचारवारकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव बीजत्वात् । व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इति चेत् न निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात् । तत्रापि व्यक्तिविशिष्टव्याप्तिग्रह इति चेन्न स्वतोव्यावृत्तगोत्वस्याव्यभिचारात् अन्यथान्योन्याश्रयात् । अपि च व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इत्यप्रयोजकं सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहाविलम्बात् । व्यभिचारावारकविशेषणशून्यएव व्याप्तिग्रह इति चेन्न प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात् । अथ तत्रोपात्तव्यभिचारावारकविशेषणत्वं विवक्षितं न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेन्न विरोधात् न हि तत्रोपात्तं तेन शून्यञ्चेति संभवति । यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गं प्रकृते च व्यभिचारादन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेन्न धूमस्याप्यतत्त्वापत्तेः व्यभिचारासद्विषयत्वेनानुमित्यकारणत्वात् । अथैकमवच्छेदकमपरत्र व्याप्तिः यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थो तत्र विशेष्यतावच्छेदकस्य व्याप्यनवच्छेदकत्वं विशेषणस्य तदवच्छेदकत्वमिति नियमात् । एकवृत्तित्वबाधे द्व्योर्व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषणात्र सा, तथा च स्वरूपासिद्धिः । तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेन्न अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात् । न च विशेष्यत्वमुपाधिः साधनव्यापकत्वात् । किञ्च सौरभ-